Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७२
सप्टेम्बर - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### दुर्व्ययसंस्कृतिः

'उत्सवप्रियाः खलु मनुष्याः।' इति उक्तेः लेहनं रसिकजनाः मधुनः इव कुर्वन्ति। परन्तु तदानीं विवाहादिषु उत्सवेषु दृश्यमानां विशालां दुर्व्ययसंस्कृतिं ते मूलात् विस्मरन्ति। विभिन्नानां वस्तूनां दुर्व्ययः अस्माकं संस्कृतेः विशिष्टता अस्ति। दुर्व्ययं कुर्वाणेषु मनुष्येषु आकण्ठं भोजनं कुर्वाणाः कदाचित् क्षमार्हाः भवेयुः, परन्तु आकण्ठं भुक्त्वा अपि भोजनं नाशयन्तः जनाः नितरां दण्डनीयाः एव। यद्यपि अद्य यावत् एतादृशेषु अपराधेषु कोऽपि दण्डः कल्पितः नास्ति, तथापि ते निर्दोषाः इत्यपि न। येन राष्ट्रेण 'अन्नं वै ब्रह्म' सूत्रं भूलोकाय प्रदत्तं, तस्मिन्नेव राष्ट्रे अन्नस्य दुर्गतिः वर्तते। प्रत्युत, अस्माकं राष्ट्रस्य नैकेषु भूभागेषु जनाः बुभुक्षया म्रियन्ते। अतः विशेषतः अयं देशद्रोहः अस्ति। इतोऽपि अधिकं दुःखं तदा भवति, यदा कश्चित् मूर्खः अन्नं नाशयति चेदपि इतरैः मूर्खैः तूष्णीं स्थीयते। तादृशी अपरा मूर्खता वर्तते – विद्युतः नाशः। प्रकोष्ठात् बहिः निर्गमनकाले वयं दूरवाणीयन्त्रं स्मर्तुं शक्नुमः, किन्तु ज्वलन्तं दीपं शमयितुं न शक्नुमः। अस्मिन् विषये छात्रालयाः, रुग्णालयाः, कार्यालयाः, मन्त्रिणां गृहाणि च भारतीयां दुर्व्ययसंस्कृतिं विशेषतः अनुसरन्ति।

जलस्य नाशः वस्तुतः कस्यचित् महतः तत्त्वस्य नाशः वर्तते इति वयं मूलात् विस्मृतवन्तः। जलं खलु ईश्वरीया विभूतिः इति विनोबावर्यस्य वचनं पाठ्यपुस्तकशेषम् अभवत्। साहित्येषु विद्यमानां भद्रां संस्कृतिं स्मरन्तः वयं यथेष्टम् आत्मानं वञ्चयामहे। वयं यं दुर्व्ययं सहसा परिहर्तुं नैव शक्नुमः, तस्मिन् विषये विशेषतः विमर्शः अपेक्ष्यते। यथाहि इन्धन-शस्त्र-कागद-प्रवासादिषु क्रियमाणं व्ययं वयं सहसा निरोधयितुं नापि शक्नुयाम। किन्तु परिहारं कर्तुं शक्येषु व्ययेषु विवेकः न क्रियते चेत् तत् अभद्रतायाः लक्षणम् अस्ति।

अन्नादीनां दुर्व्ययेन सह समयस्य दुर्व्ययं योजयितुं शक्यते। एतेषु विषयेषु चिन्तनकृपणः मनुष्यः शब्दस्य दुर्व्ययं प्रति कथं चिन्तयितुं शक्नुयात्? क्वचित् 'पाणिनेः लाघवम्' विषयम् अधिकृत्य भाषमाणः पण्डितशिरोमणिः श्रोतृगणं सुचिरं पीडयति। वाग्देवी च लज्जयति।

एतस्य कथनस्य तात्पर्यं, समाजे किमपि परिवर्तनं नास्ति इत्यपि न। इदानीन्तनाः केचन भद्राः जनाः राजनेतॄणां भाषणं श्रोतुं न उत्सहन्ते। एषा समाजस्य बौद्धिकी प्रगतिः इति वक्तुं शक्यते। तथैव बहवः सुज्ञाः वक्तारः समयात् पूर्वं व्याख्यानं समापयन्ति। एषा भद्रता समग्रां सभां नितराम् उपकरोति। यद्यपि एतत् सर्वं कच्छपस्य धावनमात्रम् अस्ति। तथापि अन्तःकरणं किञ्चित् तर्पणं तु प्राप्नोति एव।

# वक्रः पिशाचः

योगी आलोकानन्दः अरण्ये कुटीरं निर्माय शान्त्या निवसति स्म । सः शतवर्षीयः । तस्य शिष्येषु प्रमुखः धीरानन्दः । यदा स्वस्य अन्तिमकालः सन्निहितः तदा धीरानन्दम् उत्तराधिकारित्वेन घोषितवान् सः ।

कदाचित् आलोकानन्दः धीरानन्दम् एकान्ते अवदत् – "वत्स ! सर्वेषां विषये यथायोग्यम् अवधानं भवतु । आश्रमस्य कोणे स्थितायां पेटिकायां विचित्राकारा काचित् शिला अस्ति । शान्तिमन्त्रम् उच्चारयन् तां नद्यां क्षिपतु" इति ।

"गुरुवर्य ! तस्याः शिलायाः किं वैशिष्ट्यम् ? यदि आपत्तिः न स्यात् तर्हि तत् किम् इति वदतु" इति अवदत् धीरानन्दः ।

"आपत्तिः नास्ति कापि । सा च शिला मम तान्त्रिकमित्रेण केनचित् दत्ता । तस्याः अन्तः कश्चन पिशाचः अस्ति । यदि कश्चित् तया शिलया भूमिं घट्टयति तर्हि तां शिलां विभिद्य सः पिशाचः बहिः आगच्छति, 'किमपि कार्यं ददातु नैरन्तर्येण' इति वदति च । सः जनोपयोगीनि कार्याणि कर्तुं न समर्थः । किमपि वस्तु वायौ निराधारतया स्थापयितुं, विलक्षणं ध्वनिं कर्तुं, हस्ते किमपि वस्तु दर्शयितुं वा सः समर्थः । नद्यां शिलायाः क्षेपणात् तु न कापि विपत्तिः ततः" इति विवृतवान् गुरुः ।

"एतदत्र स्मर्तव्यं यत् सकृत् शिलातः बहिः आगतः पिशाचः पुनः कदापि शिलां न प्रविशति । बहिः आनीतवता तस्मै नैरन्तर्येण कार्यं चिन्तनीयम् । पञ्चानां वर्षाणाम् अनन्तरं स्वयम् अदृश्यतां गमिष्यति सः" इत्यपि उक्तवान् गुरुः ।

द्वित्रदिनानाम् अनन्तरम् आलोकानन्दस्य इहलोकव्यवहारः समाप्तः । तस्य उत्तरक्रियादिकं समाप्य धीरानन्दः गुरोः आदेशं स्मरन् कोणस्थां पेटिकाम् उद्घाटितवान् । हा हन्त ! तत्र सा विलक्षणा शिला न आसीत् । धीरानन्देन आश्रमे सर्वत्र अन्वेषणं कृतम् । किन्तु सा शिला तु न प्राप्ता एव । ततः द्वित्राणि दिनानि अतीतानि । कदाचित् मध्यरात्रे कश्चित् आश्रमस्य द्वारस्य ताडनम् अकरोत् । धीरानन्दः झटिति उत्थाय द्वारम् उद्घाटितवान् । द्वारस्य पुरतः चन्दनः नाम शिष्यः स्थितः आसीत् । आश्रमात् अनतिदूरे स्थिते ग्रामे निवसति स्म सः ।

"चन्दन ! किमर्थं मुखे म्लानता ? का समस्या बाधते ?" इति तम् अपृच्छत् धीरानन्दः ।

"अहो, विलक्षणा समस्या बाधते माम्" इति उक्त्वा पश्चात्तापेन सः पुनः अवदत् – "आर्य ! अहं क्षन्तव्यः । भवतः गुरोः च यत् सम्भाषणं प्रवृत्तं तत् मया भित्त्यन्तरितेन श्रुतम् । तस्य परिणामः अनुभूयमानः अस्ति इदानीम्" इति ।

"किं प्रवृत्तम् ?" इति धीरानन्देन पृष्टः चन्दनः अवदत् – "सम्भाषणश्रवणस्य अनन्तरं कुतूहलं रोद्धुम् अशक्नुवन् अहं पेटिकास्थां शिलां चोरितवान् । मया सा शिला भूमौ बलात् क्षिप्ता । तस्मात् पिशाचः प्रत्यक्षः जातः । सः अन्यैः न दृश्यते स्म, ऋते मत्तः । सः कार्यम् अयाचत । अहं ग्रामस्य चतुष्पथं गतवान् । तत्र बहवः आसन् । 'अहं महाश्चर्यकरीं घटनां दर्शयिष्यामि' इति तान् अवदम् । 'समीपस्थं गुल्मं दहतु' इति पिशाचम् अहम् आदिष्टवान् ।

अनन्तरक्षणे गुल्मे अग्निज्वाला दृष्टा। 'अग्निं निवारयतु' इति पिशाचम् आदिशम्। पिशाचः तथैव अकरोत्। ग्रामीणाः माम् आश्चर्येण दृष्टवन्तः। ततः अहं गृहं गतवान्। पिशाचः कार्यम् अयाचत। 'सस्यानि सिञ्चतु' इति मया आदिष्टम्। स तु सर्वाणि सस्यानि उत्पाट्य जलेन मूलानि आर्द्रीकृतवान् आसीत्। तस्य एतादृशम् अविवेकयुक्तं कार्यं दृष्ट्वा अहं नितरां खिन्नः। अग्रिमकार्यरूपेण अहम् अवदम् – 'मम हस्ते सुवर्णाङ्गुलीयकं भवतु' इति। अनन्तरक्षणे एव मम हस्ते अङ्गुलीयकं तु आगतम् एव। तस्मिन् एव समये मम भगिन्याः अङ्गुलीयकम् अदृश्यतां गतम् आसीत्। तदा मया अवगतम् – एकत्र विद्यमानम् अपरत्र आनीय दर्शयितुं समर्थः अयम्, ततोऽपि अधिकं सामर्थ्यं नास्ति इति।"

"भवान् कृष्यर्थं तं क्षेत्रं प्रति प्रेषयतु तावत्" इति असूचयत् धीरानन्दः।

"उद्याने यथा कृतं तथैव हानिं कुर्यात् सः इति भीतिः मम। अतः तादृशं कार्यं न उक्तम्। अन्यच्च सः आश्चर्योत्पादकानि कानिचन क्षुल्लककार्याणि कर्तुम् एव समर्थः, न तु उपकारकार्याणि। कथम् अहं तादृशानि कार्याणि पञ्च वर्षाणि यावत् कारयितुं शक्नुयाम् ? को वा तेषां दर्शने उत्सहेत ? तदा मम गृहकार्यादीनां का गतिः स्यात् ? दिनद्वयाभ्यन्तरे एव अहं तस्य सहवासतः श्रान्तः अस्मि। प्रतिदिनं मध्यरात्रे घण्टां यावत् सः विश्राम्यति। अतः मया अस्मिन् समये अत्र आगतम्। एतस्य पीडातः कथं मोक्षः इति न ज्ञायते मया" इति वदन् अश्रूणि स्रावितवान् चन्दनः।

धीरानन्दः क्षणकालं विचिन्त्य कमपि उपायं चन्दनम् असूचयत्। तावता तत्र उपस्थितः पिशाचः चन्दनम् अवदत् – "मम अग्रिमं कार्यं किम् इति सूचयतु" इति।

"भवदर्थं कार्यं सिद्धम् अस्ति" इति वदन् चन्दनः आश्रमात् निर्गत्य स्वगृहं गतवान्। गृहस्य पृष्ठतः कश्चन शुनकः शयितः आसीत्। तं प्रदर्शयन् चन्दनः पिशाचम् अवदत् – "मित्र! एतस्य शुनकस्य पुच्छं वक्रम् अस्ति। एतत् ऋजूकरणीयं भवता। तदवसरे एषः शुनकः अल्पतया अपि न पीडनीयः। एतत् कार्यं यदा समाप्यते तदा मां सूचयतु" इति।

"क्षणाभ्यन्तरे एतत् साधयिष्यामि" इति उक्त्वा पिशाचः शुनकस्य पुच्छस्य ऋजूकरणाय प्रयत्नम् आरब्धवान्। पौनःपुन्येन ऋजूकृतं चेदपि अग्रिमे क्षणे तत् वक्रम् एव तिष्ठति स्म। पिशाचेन पुनः पुनः प्रयत्नः कृतः। तथापि शुनकस्य पुच्छस्य वक्रता न अपगता। किञ्चित्कालानन्तरं शुनकः उत्थाय अन्यत्र अगच्छत्। पिशाचः तम् अनुसरन् स्वस्य प्रयत्नम् अनुवर्तितवान्। साफल्यं तु न प्राप्तं तेन।

वर्षाणि गतानि। पिशाचः कार्ययाचनाय पुनः चन्दनसमीपं न आगच्छत् एव। 'पञ्च वर्षाणि अतीतानि चेदपि पिशाचः कार्ये सफलः न भविष्यति। पञ्चानां वर्षाणाम् अनन्तरं सः अदृश्यतां गमिष्यति। शुनकस्य पुच्छं तु वक्रम् एव स्थास्यति' इति अचिन्तयत् चन्दनः।

कदाचित् चन्दनः धीरानन्दसमीपं गत्वा अवदत् – "आचार्यः मानवस्य स्वभावं किमर्थं शुनकपुच्छतुल्यं वदति स्म इति इदानीं मया अवगतम्। यथा शुनकस्य पुच्छस्य ऋजुता कदाचिदपि असाद्या, तथैव केषाञ्चित् स्वभावः इहजन्मनि परिवर्तयितुम् अशक्यः" इति।

एतत् श्रुत्वा धीरानन्दः हसितवान्। चन्दनस्य मुखे अपि हासः आगतः। पुनरपि क्षमां संयाच्य ततः निर्गतवान् चन्दनः।

## किं किं न साधयति कल्पलतेव विद्या !

डॉ. सुखेश्वरः झा

विद्यते - लभ्यते ज्ञानम् अनया इति विद्या । कल्पलता च इन्द्रस्य देवराजस्य नन्दनवने विद्यमाना समस्तकामनापूरणेति पौराणिकी प्रसिद्धिः । इहास्मदीये जगतीतलेऽपि सम्यगधीता विद्या प्रत्यक्षमेव सर्वपुरुषार्थान् पूरयन्ती कल्पलतायते इति शीर्षकाभिप्रायः ।

संसारे मानवानां विकासस्य इतिहासः सुदीर्घकाल-निर्मितः । मानवानां परम्परा अतिप्राचीना । तस्यां परम्परायाम् असंख्येयाः महान्तः सञ्जाताः । ते यत् किमपि विलक्षणं विचिन्त्य विहितवन्तः तेनैव इतिहासस्य शरीरं विनिर्मितम् अस्ति । तैः महद्भिः एव दृष्टाः कृताः वा विद्याः सर्वाः विकासेतिहास-वृक्षस्य सुगन्धिपुष्प-सुमधुर-फल-स्वरूपाः ।

ताश्च विद्याः चतुर्दश, अष्टादश वा कथ्यन्ते —

**अङ्गानि वेदाश्चत्वारो मीमांसा-न्यायविस्तरः ।**
**धर्म-शास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥ इति**
**तथा - आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।**
**अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादश स्मृताः ॥ इति**

एताभ्यः सर्वाभ्यः एव विद्याभ्यः जीवनीशक्तिं गृहीत्वा समुद्गता साहित्य-विद्या परमाह्लादकारिणी सर्वविध-सौख्य-सम्पादयित्री वर्तते ।

आभिश्च विद्याभिः सर्वं समधिगम्यते । यदि शारीरिकाः व्याधयः अस्वास्थ्यकारिणः, दुःखदायिनः उपस्थिताः भवन्ति तदा वैद्यविद्या तथैव तेभ्यो रोगेभ्यः संरक्षां ददाति यथा कुतोऽपि भयहेतोः माता रक्षां ददाति ।

विविध-सन्दर्भेषु जटिले जागतिके व्यवहारे कर्तव्याकर्तव्य-विमूढता यत्र तत्र व्यवहारिणां पुरस्तात् उपतिष्ठते । तदानीं धर्म-शास्त्रं नीति-शास्त्रं च इतिहास-पुराणादिकञ्च समुचितकर्तव्यमुपदिश्य मार्गदर्शनं कुर्वन्ति, यथैव माता, पिता अन्यो वा आप्तः सत्याम् आवश्यकतायाम् समुचितं नियोज्य परमामुपकृतिं कुर्वन्ति ।

वस्तुतः संसारे न किमपि दृष्टं यद् दुःखेन परिव्याप्तं न भवेत् । दुःखमेव वा प्रभूतम् इति सम्यग् अन्वभावि भगवता बुद्धेन 'सर्वं दुःखम्' इति कथयता सुखस्य परिकल्पना बहुधा क्रियते । दुःखकारणेष्वेव सुचतुराः विद्वांसः दुःखजनकत्वस्वभावम् उपेक्ष्य सुखावहत्वं तत्र तत्र समुत्पादयन्ति । एतेन विद्याबलेन दुःखानुभूतिम् अभिभूय सुखानुभूतिं विद्वांसः प्रबलीकुर्वन्ति । एतच्च साहित्य-विद्यया विशेषतः तथैव भवति यथा कान्तायाः सुमधुरेण मानसाह्लादकेन वचसा भवति । यर्थात् संसारदुःखखिन्नस्य खेदापनयनं विद्या तथैव कुरुते यथा कान्ता स्वेन मधुरोदार-सुचारु-तरव्यवहारेण श्रवणामृतेन वचनेन च कुरुते ।

विद्याभिः अर्थलाभः सुप्रसिद्ध एव । सर्वम् एव धनार्जनं सामान्यतः विद्याबुद्धि-मूलम् एव इति नात्र

सन्देहलेशोऽपि । बहवः विद्वांसः प्राचीनकालेऽपि राजभिः धनेन भृशं सम्मानिताः । 'प्रत्यक्षरं लक्षं ददौ' इति भणितिः प्रसिद्धा । 'सहसा विदधीत न क्रियाम्' इति सुक्तेरुपरि भारविः लक्षेण पुरस्कृतः इति किम्वदन्ती । अतः विद्यया धनागमात् संसारसौख्यस्य प्रधानो हेतुः सम्प्राप्तोभवति।

अनेके महापुरुषाः सुचिरं प्राग् गृहीतजन्मानः अस्मदादिसदृशाः एव बभूवुः । किन्तु जन्मग्रहणप्रकारस्य शरीरवत्तायाश्च सकलमनुष्य-समत्वे सत्यपि विद्या-बुद्धिक्षेत्रे तेषां किमपि अपूर्वं वैलक्षण्यम् अजनिष्ट। तत्प्रभावात् एव ते त्यक्त-भौतिकशरीराः अपि सुदीर्घं प्राक् इतरां गां गता अपि यशः-शरीरैः सदा इमां पृथिवीम् अधिनिवसन्तो वर्तन्ते। प्राचीना वैदिकर्षयः वाल्मीकि-व्यासादयः कवि-पितामहाः, कविकुलगुरवः कालिदासादयश्च एवं-विधाः एव । एषां यशसा जगदखिलं परिव्याप्तम् इति प्रत्यक्षम् । तत्र विद्यैव हेतुः तेषां यशो-वितनने तेभ्यः अमरत्व-प्रदानेच इति सुनिश्चितम्। 'यस्यकीर्तिः स जीवति'।

अनेकत्र संशये सति शास्त्रं तमुच्छिनत्ति - रामादिवदाचरितव्यं न रावणादिवत् इति निःसन्दिग्धमाचार-बोधः शास्त्रादेव। 'ईश्वरः अस्ति नास्ति वेति' संशये उदयनाचार्यादिकृत-कुसुमाञ्जल्यादिः संशयमपाकृत्य 'अस्ति ईश्वरः' इति साध्नोति । विद्याबलेनैव स्थले जले वा गभीरम् अधन्तात् 'कुत्र किमस्ति' इति ज्ञानादेव क्वचन ('झरिया' इत्यत्र, भागलपुरीय 'कह्लगांव' - समीपे 'ललमटिया' इत्यत्र च) प्रस्तरेन्धन (coal) खनिः, क्वचन (बम्बई समुद्रेऽपि) तैलखनिः, यत्र तत्र अन्येषाञ्च धातूनां खनयः प्राप्यन्ते च। विद्याबलेन परोक्षमपि विषयं जनाः तथा जानन्ति येन चन्द्रारोहणं मङ्गलयानावतरणञ्च समभवताम् । तस्मात् साधूक्तम् - 'अनेक संशयोच्छेदि परोक्षार्थस्य दर्शकम्। सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ इति

एतेन विद्याकल्पलता इव सर्वं मनोऽभिलषितं साधयति इति निश्चप्रचम्। एतत् अनुसन्धाय सम्यगुक्तम्-

**मातेव रक्षति पितेव हिते नियुङ्क्ते कान्तेव चाभिरमयत्यपनीय खेदम् ।**
**वित्तं तनोति वितनोति च दिक्षु कीर्तिं किं किं न साधयति कल्पलतेव विद्या ॥ इति**

## मासवार्ता

### आरब्धः दुर्गासप्तशत्याः अभ्यासक्रमः

स्तोत्राणि पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानं 'स्तोत्रपाठः' इति अभ्यासक्रमं प्रतिवर्षं सञ्चालयति । एतस्मिन् वर्षेऽपि जुलाईमासस्य द्वितीयदिनाङ्कात् आरभ्य श्रीदुर्गासप्तशत्याः अभ्यासक्रमः संस्थानेन आरब्धो वर्तते । अभ्यासक्रमेऽस्मिन् छात्राः सम्पूर्णां दुर्गासप्तशतीं पठिष्यन्ति। श्रीऋषिः पुरोहितः छात्रान् दुर्गासप्तशत्याः श्लोकानाम् उच्चारणं भावार्थं पाठक्रमं च पाठयन् अस्ति। पाठ्यक्रमेऽस्मिन् १४ छात्राः प्रवेशं स्व्यकुर्वन्। पाठ्यक्रमोऽयं डिसेम्बरमासस्य २७ दिनाङ्कं यावत् प्रचलिष्यति।

## कृपया हसन्तु

शिक्षक: -(नमनम् उद्दिश्य) भवान् वर्गे बहुवार्तालापं करोति इति अहं मन्ये ।

नमन: -न महोदय ! अहं निद्रायां कदापि वार्तालापं न करोमि ।

★ ★ ★ ★ ★

रमण: - (कनकं प्रति) भो: ! मम घटीयन्त्रं न चलति, किं करवाणि ?

कनक:- भो: मित्र ! तव घटीयन्त्रं तदैव चलिष्यति यदा तत् त्वं हस्तस्य स्थाने पादे स्थापयिष्यसि ।

★ ★ ★ ★ ★

नमन: - (रमणं प्रति ) भो: रमण ! 'I am going' इत्यस्य वाक्यस्य अर्थ: क: इति भवान् जानाति ?

रमण: - अहं गच्छामि ।

नमन: - भो: ! गमनात् पूर्वम् एतस्य वाक्यस्य अर्थं तु कथयतु ।

★ ★ ★ ★ ★

कनक: रमणाय अकथयत् - "यदि आवां मिलित्वा भोजनं कुर्व: तर्हि कथम् ?" "बहु शोभनम् । श्व: अहं भोजनाय तव गृहम् आगमिष्यामि" इति रमण: तत्क्षणम् असूचयत् ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**पृच्छेन पीयते तैलं शिखयाऽऽभा वितीर्यते ।**
**न स: सूर्य:, न चन्द्रो वा न स: पशु:, न मानव: ॥**

य: पृच्छेन तैलं पिबति शिखया प्रकाशं च वितरति । स: सूर्य: नास्ति, स: चन्द्रोऽपि नास्ति । स: पशु: नास्ति, मानव: अपि नास्ति तर्हि स: क: वर्तते ?

**उत्तरम्** – दीप:

**पुरुष: कीदृशो वेत्ति प्रायेण सफला: कला: ।**
**मध्यवर्णद्वयं त्यक्त्वा ब्रूहि क: स्यात् सुरालय: ॥**

सर्वा: कला: य: जानाति स: क: इति सम्बोध्यते ?

तस्मिन् शब्दे मध्ये स्थितम् अक्षरद्वयं यदि निष्कास्यते तर्हि स्वर्ग: इति अर्थ: प्राप्यते । क: स: शब्द: ?

**उत्तरम्** – नागरिक:

**पूजायां किं पदं प्रोक्तं किं वा पुरुषवाचकम् ।**
**क आयुधतया ख्यात: प्रलम्बासुरविद्विष: ॥**

'सु' – इत्येतत् उत्तमार्थे प्रोक्तम् । 'ना'– पुरुषवाचकम् । प्रलम्बासुरस्य शत्रो: बलरामस्य आयुधम् – 'सीर:' (हल:) ।

**उत्तरम्** – सुनासीर:

## ज्ञानसरिता

श्यामः पटेलः

**श्वेतपाषाणः कथं भवति ?**

दुग्धमिव श्वेतवर्णियैः पाषाणैः निर्मितः ताजमहालयः विश्वप्रसिद्धः अस्ति । एताः श्वेतपाषाणाः प्रस्तराः पृथिवीतः नैसर्गिकतया प्राप्यन्ते। एतेषां प्रयोगः मन्दिराणां भव्यभवनानां च निर्माणे भवति।

वसुन्धरातः लब्धमानेषु विक्षारेषु धातुषु च विभिन्नाः प्रस्तराः भवन्ति। तेषु ये प्रस्तराः वज्रक्षारात् निर्मिताः वर्तन्ते ते समयान्तरे श्वेतपाषाणाः भवन्ति । ते पाषाणाः भूमेः गर्भे भाराधिक्येन श्वेतवर्णियाश्च मृदूभवन्ति । शुद्धवज्रक्षारजातेभ्यः प्रस्तरेभ्यः धवलपाषाणाः भवन्ति। कदाचन तत्र अशुद्धिः भवेत् चेत् तेभ्यः अशुद्धियुक्तेभ्यः वज्रक्षारजातेभ्यः पाषाणेभ्यः मुख्यतः कृष्णवर्णियाः पाषाणाः अपि भवन्ति । क्वचित् धवलपाषाणेष्वपि विभिन्नवर्णियाः रेखाः भवन्ति ताः अपि अशुद्धिं दर्शयन्ति।

विश्वे बहुषु देशेषु श्वेतपाषाणस्य खनयः सन्ति। विविधेभ्यः देशेभ्यः विभिन्नाः श्वेतपाषाणाः लभ्यन्ते। प्रथमं तान् प्रस्तरान् समचतुष्कोणाकारे कर्तयन्ति । अनन्तरं संघर्षणेन परिष्कृत्य तेषां सौन्दर्यवृद्धिं कारयन्ति । भारते मकराणाप्रदेशस्य श्वेतपाषाणः भृशं धवलः अस्ति । स्पेनदेशे मेकीलप्रदेशस्य अल्मीराप्रदेशस्य चापि श्वेतपाषाणः अशुद्धिमुक्तः धवलश्च भवति।

पाकिस्तानदेशे तु "झियारत" नामाख्यायाः खनेः धवलपाषाणाः, "बादल" नामाख्यायाः खनेः कृष्णपाषाणाः च उपलभ्यन्ते। प्रमुखतः अस्य पाषाणस्य प्रयोगः तस्य मृदुत्वात् शिल्पकार्येषु भवति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **स्तूपः** | टीला | mound |
| **स्तेनः** | चोर | a thief |
| **स्तोकः** | थोडा | a little |
| **स्थण्डिलम्** | आंगन | an open field |
| **स्थविरः** | बूढा | aged |
| **स्थाणुः** | खम्भा | pole |
| **स्थापत्यम्** | भवन निर्माण कला | architecture |
| **स्नायुः** | पेशी | muscle |
| **स्निग्धः** | चिकना | oily |
| **स्पर्धा** | होड़ | rivalry |
| **स्पशः** | गुप्तचर | a spy |
| **स्फुलिङ्गम्** | चिनगारी | a spark |
| **स्फुर्जः** | बादलों की गर्जन | crashing sound of clouds |
| **स्मयः** | आश्चर्य | surprise |
| **स्मितम्** | मुस्कान | smiling |

## किं भवन्तः जानन्ति ?

**१ ) बृहत्संहितायाः रचिता कः वर्तते ?**

(क) भास्कराचार्यः (ख) वराहमिहिरः (ग) आर्यभटः (घ) श्रीहर्षः

**२ ) ज्योतिर्विदाभरणस्य कर्ता कः वर्तते ?**

(क) बल्लालकविः (ख) भासः (ग) कालिदासः (घ) भारविः

**३ ) 'दशरूपकम्' ग्रन्थस्य रचयिता कः वर्तते ?**

(क) धनञ्जयः (ख) धनपालः (ग) जयदेवः (घ) वरदराजाचार्यः

**४ ) प्रबोधचन्द्रोदयस्य कर्ता कः वर्तते ?**

(क) कालिदासः (ख) भवभूतिः (ग) श्रीहर्षः (घ) श्रीकृष्णमिश्रः

**५ ) ययातिचरितस्य रचयिता कः वर्तते ?**

(क) रुद्रदेवः (ख) सोमदेवः (ग) जयदेवः (घ) स्वयंभूदेवः

**६ ) राघवपाण्डवीयग्रन्थस्य कर्ता कः वर्तते ?**

(क) धनञ्जयः (ख) भर्तृहरिः (ग) जायसी (घ) वराहमिहिरः

**७ ) 'धम्मपद' इति कस्य धर्मस्य ग्रन्थः वर्तते ?**

(क) जैन (ख) सिख (ग) बौद्ध (घ) यहूदी

उत्तराणि – (१) ख (२) ग (३) क (४) घ (५) क (६) क (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

## संस्कृत-सम्भाषण-वर्गः

**( प्रथमः स्तरः )**

**Date :** 02/09/20 to 14/12/20
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am
**Fees :** 5000/-

- **Venue :** Eklavya Sanskrit Academy
  Core House, Nr Parimal Garden,
  Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક **એકલવ્ય સંસ્કૃત એકેડેમી** દ્વારા આયોજીત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતાઃ

- → તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
- → પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
- → અનુભવિ શિક્ષકો દ્વારા શિક્ષણ.
- → શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

- **Contact:** Dr. Mihir Upadhyay,
  Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006